गंगा सहस्रनाम

गं॰स॰

श्रीगणेशायनमः अगस्त्युवाच विनास्नानेनगं
१ गायान्नराणांजन्मनिरर्थकं उपायांतरमस्त्वन्ययेन
स्नानफलंभवेत् १ अशक्तानांचपंगूनामालस्यो
पहतात्मनां दूरदेशांतरस्थानांगंगास्नानंकथंभ
वेत् २ दानंवाथव्रतंवाथमंत्रस्तोत्रंजपोथवा तीर्था
तराभिषेकोवादेवतोपासनंतुवा ३ यद्यस्तिकिंचि
न्नमब्रूहिगंगास्नानफलप्रदं विधानांतरमत्रेशात र
द्वदपृच्छतायमे ४ त्वत्तोनवेदस्कंदान्योगंगागर्भस रा॰म॰
मुद्भव परंस्वर्गतरंगिण्यामहिमानंमहामते ५ स्कं
द उवाच संतिपुण्यजलानीह सरांसिसरितोमुने॥
स्थानेस्थानेचतीर्थानिजितात्माध्युषितानिच॥ ६॥
१

दष्टपुत्त्ययकारीतिमहामहिमभांन्यपि परं स्वर्गत
रं जिगम्याः कोप्यंशोपि न तत्रैव ७ अनेनैवानुमाने
न बुध्यस्व कलशोद्भव दध्रे गंगोत्तमांगेन देवदेवेन
शंभुना ८ स्नानकालेन्यतीर्थेषु जप्यते जाह्नवीज
नैः विना विष्णुपदीं कान्यत्समर्थमघशोधने ९
गंगास्नानफलं ब्रह्मन् गंगायामेव लभ्यते यथा
द्राक्षाफलस्वादो द्राक्षायामेव नान्यतः १० अस्तु
पापद्रुहत्वेकः स्याद्येनाविकलं फलं स्नानस्य दे
वसरितो महागुह्यतमो मुने ११ शिवभक्ताय शां
ताय विष्णुभक्तिपराय च श्रद्धालवे त्वास्तिकाय
गर्भवासमुमुक्षवे १२ कथनीयं न चान्यस्य क

स्यचित्केनचिन्कचित् इदंरहस्यंपरमंमहा
पातकनाशनं १३ महाश्रेयस्करंपुण्यंमनोरथ
२ करंपरं द्युनदीप्रीतिजनकंशिवसंतोषसंततिः॥
१४ नाम्नांसहस्रंगंगायास्तवराजेषुशोभनं ज
प्यानांपरमंजप्यंवेदोपनिषदांसमं १५ जपनी
यंप्रयत्नेनमौनिनावाचकंविना शुचिस्थानेषु
शुचिनासुस्पष्टाक्षरमेवच १६ श्रीस्कंदउवा
च ॐनमोगंगादेव्यै ॐकाररूपिण्यजराऽतुला राम॰
नंतामृतस्रवा अत्युदाराभयाशोकाऽलकनंदा
ऽमृताऽमला १७ अनाद्यवत्सलामोघाऽपांयोनि
रमृतप्रदा अव्यक्तलक्षणाक्षोभ्याऽनवच्छिन्ना

पराजिता १८ अनाथनाथाभीष्टार्थसिद्धिदा
नंगवर्द्धिनी अणिमादिगुणाधाराऽग्रजराणाली
कह्नारिणी १९ अचिंत्यशक्तिरनघाऽद्भुतरूपा
घहारिणी अद्रिराजसुताष्टांगयोगसिद्धिप्रदा
च्युता २० अक्षुणशक्तिरसुदानंततीर्थामतोद्
का अनंतमहिमापारानंतसौख्यप्रदान्नदा॥
२१ अशेषदेवतामूर्तिरघोरामतरूपिणी अ
विद्याजालशमनी ह्यप्रतक्यगतिप्रदा २२ अशे
षदेवतामूर्तिः विधुसंहर्त्रीत्वशेषगुणागुंफि
ता अज्ञानतिमिरज्योतिरनुग्रहपरायणा २३

अभिरामानवद्यांग्यनंतसाराकलंकिनी आ
रोग्यदानंदवल्लीत्वापन्नार्तिविनाशिनी ॥२४॥
३ आश्चर्यमूर्तिरायुष्या ह्याढ्याद्याप्रार्यसेविता ॥ आ
प्यायिन्यासविद्याख्यात्वानंदाश्वासदायिनी ॥२५॥
आलस्यघ्न्यापदांहंत्री ह्यानंदामृतवर्षिणी ॥ इरा
वतीष्टदात्रीष्टात्विष्टापूर्तफलप्रदा ॥२६॥ इतिहास
श्रुतीड्यार्था त्विहामुत्रशुभप्रदा ॥ इज्याशीलस
मिज्येष्टात्विंद्रादिपरिवंदिता ॥२७॥ इलालंकार
मालेद्धात्विंदिरारम्यमंदिरा ॥ इदिंदिरादिसंसे राम.
व्यात्वीश्वरीश्वरवल्लभा ॥२८॥ ईतिभीतिहरेड्या
चत्वीडनीयचरित्रभृत् ॥ उत्कृष्टशक्तिरुत्कृष्टा

डुपमंडलचारिणी॥२९॥उद्दितांवरमार्गोस्वो
र्गलोकविहारिणी॥उक्षोर्वशेत्यलोकुंभोउ
पेंद्रचरणद्रवा॥३०॥उदन्वत्पूर्तिहेतुश्चोदारो
स्ताहपूर्वर्द्धिनी॥उद्वेगघ्नुलशमनीह्युसरश्मि
सुताप्रिया॥३१॥उत्पत्तिस्थितिसंहारकारिणुप
रिचारिणी॥ऊर्जंवहंत्यूर्जधरोर्जावनीचोर्मिमालि
नी॥३२॥ऊर्ध्वरेतःप्रियोर्ध्वाध्वाभूर्मिलोर्ध्वगति
प्रदा॥ऋषिवंदस्तुतर्द्धिश्चऋणत्रयविनाशि
नी॥३३॥ऋतंभरर्द्धिदात्रीचऋक्वरूपाऋतु
प्रिया॥ऋक्षमार्गवहर्द्धार्चिऋजुमार्गप्रदर्शिनी॥
३४॥एधिताखिलधर्मार्थात्वेकैकामृतदायिनी॥

उं॰स॰

ए धनी यस्व मावैज्यात्वे जिताशेषपानका॥३५॥
ऐश्वर्य्यदैश्वर्यरूपा ह्रौं ति ह्रां ह्रैं देवी द्युतिः॥ओज
४ स्विन्यौषधी स्त्रेत्रमो जो दौदनदायिनी॥३६॥औ
षामृत्तौन्नत्यदात्री ल्लौषधंभवरोगिणां॥औदा
र्यचंचुरै पैंद्री ल्वौग्री ह्यौ मेयरूपिणी॥३७॥अंब
राध्ववहांऽवष्टावरमालां वुजेक्षणा॥अंविकां
वुमहायोनिरंधोसंधकहारिणी॥३८॥अंशु
मालाह्यंशुमर्तीत्वंगीकृतषडानना॥अंधता॥ राम०
मिस्रहं अंधपुरंजना ह्यंजनावती॥३९॥कल्या
णाकारिणी काम्या कमलोत्पलगंधिनी॥कु
मुद्वती कमलिनी कांतिः कल्पितदायिनी॥४०॥

३

कांचनाक्षी कामधेनुः कीर्तिकृत्क्लेशनाशिनी॥
क्रतुश्रेष्ठा क्रतुफला कर्मबंधविभेदिनी॥४१॥
कमलाक्षी क्लमहरा कृशानुतपनद्युतिः॥ करु
णार्द्री च कल्याणी काली कलुषवैरिणी॥४२॥
कामरूपा क्रियाशक्तिः कमलोत्पलमालिनी॥
कूटस्था करुणा कांता कूर्मयाना कलावती॥४३॥
कमला कल्पलतिका काली कलुषवैरिणी॥ क
मनीयजला कम्रा कपर्दिसुकपर्दगा॥४४॥ का
लकूटप्रशमनी कदंबकुसुमप्रिया॥ कालिंदी
केलिललिता कलकल्लोलमालिका॥४५॥ क्रां
तलोकत्रया कंडूः कंडूतनयवत्सला॥ खड्गि

नीखड्गधाराभाखगाखंडेंदुधारिणी॥४६॥खेखे
लगामिनीखस्थाखंडेंदुतिलकप्रिया॥खेचरी
५ खेचरीवंद्याख्यातिःख्यातिप्रदायिनी॥४७॥
खंडितप्रणताघौघाखलबुद्धिविनाशिनी॥
खातैनःकंदसंदोहाखड्गखट्वांगखेटनी॥४८॥
खरसंतापशमनीखनिःपीयूषपाथसां॥गंगा
गंधवतीगौरीगंधर्वनगरप्रिया॥४९॥गंभी
रंगीगुणमयीगतातंकागतिप्रिया॥गणनाथां
विकागीतागद्यपद्यपरिष्टुता॥५०॥गांधारी राम०
गर्भशमनीगतिभ्रष्टगतिप्रदा॥गोमतीगुह्य
विद्यागौर्गोप्त्रीगगनगामिनी॥५१॥गोत्रप्र

वर्द्धिनीगुणगणागुणातीतागुणाग्रणीः॥गुणांत्विका
गिरिसुतागोविंदांघ्रिसमुद्भवा॥५२॥गुणनीय
चरित्राचगायत्रीगिरिशप्रिया॥गूढरूपागु
णवतीगुर्वीगौरववर्द्धिनी॥५३॥ग्रहपीडाहरा
गुंद्रागरघ्नीगानवत्सला॥घर्महंत्रीघृतवती
घृततुष्टिप्रदायिनी॥५४॥घंटारवप्रियाघोरा
घौघविध्वंसकारिणी॥घ्राणतुष्टिकरीघोषा
घनानंदाघनप्रिया॥५५॥घातुकाघूर्णित
जलाघृष्टपातकसंततिः॥घटकोटिप्रपीता
पाघटिताशेषमंगला॥५६॥घृणावतीघृणि
निधिर्घस्मराघूकनादिनी॥घुसृणापिंजर

ग॰स॰

६ तनुर्घर्घरीघर्घरस्वना॥५७॥चंद्रिकाचंद्रकां
तांवुश्रृंचलापाचलद्युतिः॥चिन्मयीचित्तिरू
पाचचंद्रायुतशतानना॥५८॥चांपेयलोच
नाचारूप्सांगीचारुगामिनी॥चार्याचरित्र
निलयाचित्रकृच्चित्ररूपिणी॥५९॥चंपू
दनश्रुच्चैवुश्रचैनीयाचिरस्थिरा॥चारुचंप
कमालाढ्याचमिताशेषदुष्कृता॥६०॥चिदाका
शवहाचिंत्याचंचच्चामरवीजिता॥चोरिता राम॰
शेषवृजिनाचरिताशेषमंडला॥६१॥छेदिता
खिलपापौघा[illegible]मघ्नीछलहारिणी॥छन्न
त्रिविष्टपतलाछेदिताशेषवंधना॥६२॥

६

क्कुरितामतधारौघाच्छिन्नैनाःच्छंदगामिनी॥
छत्रीकृतमरालौघाछुटीकृतनिजामृता॥
६३॥जान्हवीज्याजगन्माताजप्यजेष्टालवी
चिका॥जयाजनार्द्दनप्रीताजुषणीयाजग
च्छिता॥६४॥जीवनंजीवनप्राणाजगज्जेष्टा
जगन्मयी॥जीवजीवातुलतिकाजन्मिजन्म
निवर्हिणी॥६५॥जाड्यविध्वंसनकरीजगद्यो
निर्जलाविला॥जगदानंदजननीजलजा
जलजेक्षणा॥६६॥जनलोचनपीयूषाजटा
तटविहारिणी॥जयंतीजंजपूकघ्नीजनित
ज्ञानविग्रहा॥६७॥जल्लरीवाद्यकुशलाजल

जालजलावृता॥झिंटीशवंद्याझंकारकारिणी
झर्झरावती॥६८॥टीकिताखिलपातालाटंकि
७ कैनोद्रिपाटने॥टंकारनृत्यत्कल्लोलाटीकनीय
महातटा॥६९॥डंबरप्रवहाडीनराजहंसकुला
कुला॥डमडमरुहस्ताचडामरोक्तमहांडका॥७०॥
ढौकिताशेषनिर्वाणाढक्कानादचलज्जला॥
ढुंढिविघ्नेशजननीढणढुणितपातका॥७१॥
तर्पणीतीर्थतीर्थाचत्रिपथात्रिदशेश्वरी॥त्रि
लोकगोप्त्रीतोयेशीत्रैलोक्यपरिवंदिता॥७२॥ राम॰
तापत्रितयसंहर्त्रीतेजोबलविवर्द्धिनी॥त्रिल
क्ष्यातारिणीतारातारापतिकरार्चिता॥७३॥

त्रैलोक्यपावनीपुण्यातुष्टिदातुष्टिरूपिणी॥ तस्माद्धे
त्रीतीर्थमातात्रिविक्रमपदोद्भवा॥७४॥ तपोमयीत
पोरूपातपस्तामफलप्रदा॥ त्रैलोक्यव्यापिनीतृप्तिः
तृप्तिकृत्तत्वरूपिणी॥७५॥ त्रैलोक्यसुंदरीतुर्यातुर्या
तीतपदप्रदा॥ त्रैलोक्यलक्ष्मीस्त्रिपदीतथ्यातिमिर
चंद्रिका॥७६॥ तेजोगर्भातपःसारात्रिपुरारिशिरो
गृहा॥ त्रयीस्वरूपिणीतन्वीतपनांगजभीतिनुत्
॥७७॥ तरिस्तरणिजामित्रंतर्पिताशेषपूर्वजा॥ तु
लाविरहितातीव्रपापतूलतनूनपात्॥७८॥ दा
रिद्र्यदमनीदक्षादुःप्रेक्ष्यादिव्यमंडना॥ दीक्षाव

तीदुरावाप्याद्रुसामधुरवारिभृत्॥७९॥दर्शिताने
ककुतुकादुष्टदुर्जयदुःखहृत्॥दैन्यहृद्दुरितघ्नी
८ चदानवारिपदाब्जजा॥८०॥दंदशूकविषघ्नीच
दारिताघौघसंततिः॥द्रुतादेवद्रुमच्छन्नादुर्वारा
घविघातिनी॥८१॥दमग्राह्यादेवमातादेवलो
कप्रदर्शिनी॥देवदेवप्रियादेवीदिक्पालपददा
यिनी॥८२॥दीर्घायुःकारिणीदीर्घादोग्ध्रीदूष राम॰
णवर्जिता॥दुग्धांबुवाहिनीदोह्यादिव्यादिव्य
गतिप्रदा॥८३॥द्युनदीदीनशरणंदेहिदेहनिवा
रिणी॥द्राघीयसीदाघहंत्रीदितपातकसंततिः॥८४॥

दूरदेशांतरचरी दुर्गमा देववल्लभा ॥ दुर्वृत्तघ्नी दु
र्विगाह्या दयाधारा दयावती ॥ ८५ ॥ दुरासदा दान
शीला द्राविणी द्रुहिणस्तुता ॥ दैत्यदानवसंशुद्धि
कर्त्री दुर्बुद्धिहारिणी ॥ ८६ ॥ दानसारा दयासारा
द्यावाभूमिविगाहिनी ॥ दृष्टादृष्टफलप्राप्तिर्देव
तावृंदवंदिता ॥ ८७ ॥ दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया
दुरालभा ॥ दंडयित्री दंडनीतिर्दुष्टदंडधराचिंता ॥
८८ ॥ दुरोदरघ्नी दावार्चिर्द्रवद्द्रव्यैकशेवधिः ॥ दी
नसंतापशमनी दात्री दवथुवैरिणी ॥ ८९ ॥ दरीवि
दारणपरा दांता दांतजनप्रिया ॥ दारिताद्रितटा दु

र्गादुर्गारहरणपुच्चारिणी ॥ ८० ॥ धर्मद्रवा धर्मधुरा धे
नुर्धीरा धृतिर्ध्रुवा ॥ धेनुदानफलस्पर्शा धर्मका
 मार्थमोक्षदा ॥ ८१ ॥ धर्मोर्मिवाहिनी धुर्या धात्री
धात्रिविभूषणा ॥ धर्मिणी धर्मशीला च धन्विको
टिकृतावना ॥ ८२ ॥ ध्यातृपापहरा ध्येया धावनी
धूतकल्मषा ॥ धर्मधारा धर्मसारा धनदा धन
वर्द्धिनी ॥ ८३ ॥ धर्माधर्मगुणच्छेत्री धत्तूरकुसु रामं
मप्रिया ॥ धर्मेशी धर्मशास्त्रज्ञा धनधान्यसमृद्धि
कृत् ॥ ८४ ॥ धर्मलभ्या धर्मजला धर्मप्रसवधर्मि
णी ॥ ध्यानगम्यस्वरूपा च धरणी धातृपूजिता ॥ ८५ ॥

धूर्धूर्जटिजटासंस्थाचन्याधीधीररणावती॥नं
न दानिर्वाणजननीनंदिनीनुन्नपातका॥९६॥नि
षिद्धविधूनिचयानिजानंदप्रकाशिनी॥नमो
गणाम्बरीनूतिर्नम्यानारायणीनुता॥९७॥नि
र्मलानिर्मलाख्यानानाशिनीतापसंपदां॥नि
यतानित्यसुखदानानाश्चर्यमहानिधिः॥९८॥
नदीनदसरोमातानायिकानाकदीर्घिका:॥
नष्टोद्धरणाधीराचनंदनानंददायिनी॥९९॥
निर्णिक्ताशेषभुवनानिःसंगानिरुपद्रवा॥नि
रालंबानिःप्रपंचानिर्णाशितमहामला॥१००॥

निर्मलज्ञानजननी निःशेषप्राणितापहृत् ॥ नि
१० त्योत्सवा नित्यतृप्ता नमस्कार्या निरंजना ॥ १०१ ॥
निष्ठावती निरातंका निर्लेपा निश्चलात्मिका ॥ नि
रवद्या निरीहा च नीललोहितमूर्द्धगा ॥ २ ॥ नंदिभृं
गिगणस्तुत्या नागानेयनगात्मजा ॥ निःप्रत्यूहा ना
कनदी निरयार्णवदीर्घनौः ॥ ३ ॥ पुण्यप्रदा पुण्यग
र्भा पुराणा पुण्यतरंगिणी ॥ पृथुः पृथुफला पूर्णा पू
र्णतार्तिपुभंजिनी ॥ ४ ॥ पुराणदा पुराणजननी पुराणे रामः
शीपुराणरूपिणी ॥ पचालपापराशक्तिः पुरुजित्प
रमप्रिया ॥ ५ ॥ परापरफलप्राप्तिः पावनी च पय।
स्विनी ॥ परानंदा प्रकृष्टार्था प्रतिष्ठा पालनी परा ॥ ६ ॥

पुराणपठितापूीतापूणवाक्सरूपिणी॥ पार्वतीपृ
मसंपन्नापशुपाशविनाशिनी॥७॥ परमात्मस्वरू
पात्वपरबूह्मपूकाशिनी॥ परमानंदनिष्यंदापूाय
श्चित्तस्वरूपिणी॥८॥ पानीयरूपनिर्वाणापवित्रा
णपरायणा॥ पापेंधनदवज्वालापापारिःपाप
नामनुत्॥९॥ परमैश्वर्यजननीपूज्ञापूज्ञापराव
रा॥ पूत्यक्षलक्ष्मीपद्माक्षीपरव्योमामृतस्रवा॥१०॥
पूसन्नरूपापूणिधिःपूजापूत्यक्षदेवता॥ पिनाकी
परमपूीतापरमेष्टिकमंडलुः॥११॥ पद्मनाभपदा
र्घ्येणपूसूतापद्ममालिनी॥ परर्द्धिदापुष्टिकरीप
थ्यापूर्तिःपूभावती॥१२॥ पुनानापीतगर्भघ्नीपापप
र्वतनाशिनी॥ फलिनीफलहस्तात्वफुल्लांवुज

विलोचना ॥१३॥ फालितैनोमहाद्रेश्चाफालिलोकविभू

षणां ॥ फेनछलप्रणुन्नैनाः फुल्लकैरवगंधिनी ॥१४॥
फेनिलाछांबुधाराभा फडुच्चाटितपातका ॥ फाणित
स्वादुसलिला फांटपथ्यजलाविला ॥१५॥ विश्वमाता
च विश्वेशी विश्वा विश्वेश्वरप्रिया ॥ ब्रह्मण्या ब्रह्म
कृद्ब्राह्मी ब्रह्मिष्टा विमलोदका ॥१६॥ विभावरी च विर
जा विक्रांतानेकविष्टपा ॥ विश्वमित्रं विष्णुपदी वै
ष्णवी वैष्णवप्रिया ॥१७॥ विरूपाक्षप्रियकरी विभू

तिर्विश्वतोमुखी ॥ विपाशा वैबुधी वेद्या वेदाक्षररस
स्रवा ॥१८॥ विद्या वेगवती वंद्या बृंहणी ब्रह्मवादिनी ॥
वरदा विप्रकृष्टा च वरिष्टा च विशोधनी ॥१९॥ विद्या

धरी विशोका च वयोवृंदनिषेविता॥ वृहदकावल
वती सोमस्या विवुधप्रिया॥२०॥ वाणी वेदवती विज्ञा
वृह्मविद्यातरंगिणी॥ वृह्मांडकोटिव्याप्तांवुवृह्महस्ता
पद्महारिणी॥२१॥ वृह्मेश विष्णुरूपा च वृद्धिर्विभववर्द्धि
नी॥ विलासि सुखदा वश्या व्यापिनी च वृषारतिः॥२२॥
वृषांकमौलिनिलया विपन्नार्तिप्रभंजिनी॥ विनीता
विनता वृधृतनया विनयान्विता॥२३॥ विपंचीवाद्य
कुशला वेणुश्रुतिविचक्षणा॥ वर्चस्करी वलकरी
वलोन्मूलितकल्मषा॥२४॥ विपाप्मा विगतातंका वि
कल्पपरिवर्जिता॥ वृष्टिकर्त्री वृष्टिजला विधिर्वि
छिन्नवंधना॥२५॥ वृतरूपा वित्तरूपा वहुविघ्नवि

नाशकृत॥वसुधारा वसुमती विचित्रांगी विभावसुः॥
२६॥विजया विश्ववीजं च वामदेवी वरप्रदा॥वृषा
१२ श्रिता वषघ्नी च विज्ञानोर्म्यंशुमालिनी॥२७॥भव्या
भोगवती भद्रा भवानी भूतभावनी॥भूतधात्री भय
हृत्या भक्तदारिद्र्यघातिनी॥२८॥भुक्तिमुक्तिप्रदा भेशी
भक्तस्वर्गापवर्गदा॥भागीरथी भानुमती भाग्यं भो
गवती भृतिः॥२९॥भवप्रिया भवद्वेष्ट्री भूतिदा भूति
भूषणा॥भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः॥ गा०म०
३०॥भ्रांतिज्ञानप्रशमनी भिन्नब्रह्मांडमंडपाः॥भूरि
दा भक्तिसुलभा भाग्यवद्दृष्टिगोचरा॥३१॥भंजितो
पप्लवकुला भक्ष्यभोज्यसुखप्रदा॥भिक्षणीया भि

द्वमाताभावाभावस्वरूपिणी॥३२॥मंदाकिनीमहा
नंदामातामुक्तितरंगिणी॥महोदयामधुमतीमहापु
ण्यामुदाकरी॥३३॥मुनिस्तुतामोहहंत्रीमहातीर्थाम
धुस्रवा॥माधवीमानिनीमान्यामनोरथपथातिगा
॥३४॥मोक्षदामतिदामुख्यामहाभाग्यजनाश्रिता॥
महावेगवतीमेध्यामहामहिमभूषणा॥३५॥महाप्र-
भावामहतीमीनचंचललोचना॥महाकारुण्यसंपू
र्णामहर्द्धिश्चमहोत्पला[illegible]॥मूर्तिमन्मुक्तिरमणीम
णिमाणिक्यभूषणा॥मुक्ताकलापनेपथ्यामनोनयन
नंदिनी॥३७॥महापातकराशिघ्नीमहादेवार्द्धहारिणी
॥महोर्मिमालिनीमुक्तामहादेवीमनोन्मयी॥३८॥

महापुण्योदयप्राप्या मायातिमिरचंद्रिका॥ महावि
द्या महामाया महामेधा महौषधं॥३९॥ मालाधरी
१३ महोपाया महोरगविभूषणा॥ महामोहप्रशमनी म
हामंगलमंगलं॥४०॥ मा[illegible]डमंडलचरी महालक्ष्मि
र्मदोज्झिता॥ यशस्विनी यशोदा च योग्या युक्तात्मसेवि
ता॥४१॥ योगसिद्धिप्रदा याज्या यज्ञेशपरिपूजिता॥
यज्ञेशी यज्ञफलदा यजनीया यशस्करी॥४२॥ यमि
सेव्या योगयोनिर्योगिनी युक्तबुद्धिदा॥ योगज्ञानप्रद
युक्ता यमाद्यष्टांगयोगयुक्॥४३॥ यंत्रिताघौघसंचा राम०
रा यमलोकनिवारिणी॥ यातायातप्रशमनी यातना
नामकृंतनी॥४४॥ यामिनीशहिमाच्छोदा युगधर्म

विवर्जिता॥रेवतीरत्तिकुंडस्थारत्नगर्भारमारतिः॥
४५॥रत्नाकरप्रेमपात्रंरसज्ञारससरूपिणी॥रत्नप्रसा
दगर्भास्वरमणीयतरंगिणी॥४६॥रत्नार्चिरुद्धरमणी
रागद्वेषविनाशिनी॥रमारामारम्यरूपारोगजीजीवा
तुरूपिणी॥४७॥रुचिकृद्रोचनीरम्यारुचिरारोगहा
रिणी॥राजहंसारववतीराजत्कल्लोलराजिका॥४८॥
रामणीयकरेखाचरुजारीरोगशोषिणी॥राकारंका
र्तिशमनीरम्यारोलंबराविणी॥४९॥रागिणीरंजि
तशिवारूपलावण्यशेवधिः॥लोकप्रसूर्लोकवंद्या
लोलत्कल्लोलमालिनी॥५०॥लीलावतीलोकभूमि
लोकलोचनचंद्रिका॥लेखस्रवंतीलटभालघुवे

गालघुत्वहृत्॥५१॥लास्यत्तरंगहस्ताचललितालय
मंगिगा॥लोकवंधुर्लोकधात्रीलोकोत्तरगुणोर्जिता
१४ ॥५२॥लोकत्रयहितालोका लक्ष्मीर्लक्षणलक्षिता॥
लीलालक्षितनिर्वाणालावण्यामृतवर्षिणी॥५३॥वै
श्वानरीवासवेड्यावंध्यत्वपरिहारिणी॥वासुदेवां
घ्रिरेणुघ्नीवज्रिवज्रनिवारिणी॥५४॥शुभावतीशु
भफलाशांतिःशंतनुवल्लभा॥शूलिनीशैशववयाः
शीतलामृतवाहिनी॥५५॥शोभावतीशीलवतीशो
षिताशेषकिल्बिषा॥शरण्याशिवदाशिष्टाशरजन्म राम॰
प्रसूःशिवा॥५६॥शक्तिःशशांकविमलाशमनस्वसृ
संमता॥शमाशमनमार्गघ्नीशितिकंठमहाप्रिया॥५७॥
शुचिःशुचिकरीशेषाशेषशायीपदोद्भवा॥श्रीनिवा

सम्भु'तीश्रद्धाश्रीमतीश्रीश्चभवूता।।५८।।शुद्धविद्या
शुभावार्ताश्रुतानंदाश्रुतिस्तुतिः।।शिवेतरघ्नीशवरीशां
वरीरूपधारिणी।।५९।।श्मशानशोधनीशांताशश्व
छतधृतिस्तुता।।शालिनीशालिशोभाढ्याशिखिवाह
नगर्भभृत्।।६०।।शंसनीयचरित्राश्चशांतिताशेषपात
का।।षड्गुणैश्वर्यसंपन्नाषडंगश्रुतिरूपिणी।।६१।।षं
डताह्वारिसलिलाप्यायन्नदनदीशता।।सरिद्वराश्चसु
रसासुप्रभासुरदीर्घिका।।६२।।स्वःसिंधुःसर्वदुःखघ्नी
सर्वव्याधिमहौषधं।।सेव्यासिद्धिःसतीसूक्तिःस्कंदसू
श्चसरस्वती।।६३।।संपत्तरंगिणीस्तुत्यास्थाणुमौलि
कृतास्पदा।।स्थैर्यदासुभगासौख्यास्त्रीषुसौभाग्यदा
यिनी।।६४।।स्वर्गनिःश्रेणिमुने।।७.क्षमास्वधास्वाहा

स्वधाजला॥समुद्ररूपिणी त्रीलो[illegible]सर्वपातकवैरिणी॥
६५॥स्मृताघहारिणी सीता संसाराब्धितरंडिका॥सौ
१५ भाग्यसुंदरी संध्या सर्वसारसमन्विता॥६६॥हरप्रि
याहृषीकेशी हंससरूपा हिरण्मयी॥हृताघसंघाहित
कृद्धेलाहेलाघगर्वहृत्॥६७॥क्षेमदा स्नालिताघौ
घा स्तुद्रविद्राविणी क्षमा॥इतिनामसहस्रं हि गंगायाः
कलशोद्भव॥६८॥कीर्तयित्वा नरः सम्यक् गंगास्नान
फलं लभेत्॥सर्वपापप्रशमनं सर्वविघ्नविनाशनं॥ रामं
सर्वस्तोत्रजपाच्छ्रेष्ठं सर्वपावनपावनं॥६९॥श्रद्ध
याभीष्टफलदं चतुर्वर्गसमृद्धिकृत्॥सकृज्जपाद
वाप्नोति ह्येकक्रतुफलं मुने॥७०॥सर्वतीर्थेषु यः

स्नातः सर्वयज्ञेषु दीक्षितः ॥ तस्य यत्फलमुद्दिष्टं त्रि
कालपठनात्सकृत् ॥ ७१ ॥ सर्ववृत्तेषु यत्पुण्यं सम्य
क्चीर्णेषु वाडव ॥ तत्फलं समवाप्नोति त्रिसंध्यं निय
तः पठेत् ॥ ७२ ॥ स्नानकाले पठेद्यस्तु यत्र कुत्र ज
लाशये ॥ तत्र सन्निहितां नूनं गंगा त्रिपथगा मुने ॥
७३ ॥ श्रेयोर्थी लभते श्रेयो धनार्थी लभते धनं ॥ का
मी कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥ ७४ ॥
वर्षं त्रिकालपठनाच्छ्रद्धया शुचिमानसः ॥ ऋ[illegible]
कालाभिगमनादपुत्रः पुत्रवान्भवेत् ॥ ७५ ॥ नाका
लमरणं तस्य नाग्निचौरादिसाध्वसं ॥ नाम्नां सहस्रं
गंगाया यो जपेच्छ्रद्धया मुने ॥ ७६ ॥ गंगानामसह

गं॰स॰

स्त्रंतुजप्त्वागंगामंतरंब्रजेत्॥ कार्यसिद्धिमवाप्नोतिनि

र्विघ्नोजह्माविशेत्॥७७॥ तिथिवारर्क्षयोगानांनदो

१६ षःप्रभवेत्तदा॥ यदाजप्त्वाब्रजेदेतत्स्तोत्रंग्रामांतरंन

रः॥७८॥ आयुरारोग्यजननंसर्वोपद्रवनाशनं॥ स

र्वसिद्धिकरंपुंसांगंगानामसहस्रकं॥७९॥ जन्मां

तरसहस्रेषुयत्पापंसम्यगर्जितं॥ गंगानामसह

स्रस्यजपनात्तत्क्षयंब्रजेत्॥८०॥ ब्रह्मघ्नोमद्यपः

स्वर्णस्तेयीचगुरुतल्पगः॥ तत्संयोगीभ्रूणहंतामा राम॰

तृहापितृहामुने॥८१॥ विश्वासघातीगरदःकृत

घ्नोमित्रघातकः॥ अग्निदोगोवधकरोगुरुद्रव्या

पहारकः॥८२॥ महापातकयुक्तोपिसंयुक्तोप्यु

पपातकैः॥मुच्यतेश्रद्धयाजप्त्वागंगानामसहस्रकं॥८३॥
आधिव्याधिपरिक्षिप्तोघोरतापपरिप्लुतः॥मुच्यतेसर्व
दुःखेभ्यस्तवस्यास्यानुकीर्तनात्॥८४॥संवत्सरेणायु
क्तात्मापठन्भक्तिपरायणः॥अभीप्सितांलभेत्सिद्धिंस
र्वपापैःप्रमुच्यते॥८५॥संशयाविष्टचित्तस्यधर्मविद्वे
षिणोपिच॥दांभिकस्यापिहिंस्रस्यचेतोधर्मपरंभवेत्॥
८६॥वर्णाश्रमपथीनस्तुकामक्रोधविवर्जितः॥यत्फ
लंलभतेज्ञानीतदाप्नोत्यस्यकीर्तनात्॥८७॥गायत्र्ययु
तजप्येनयत्फलंसमुपार्जितं॥सकृत्पठनतःसम्यक्त
दशेषमवाप्नुयात्॥८८॥गांदत्त्वावेदविदुषेयत्फलंल
भतेकृती॥तत्पुण्यंसम्यगाख्यातंस्तवराजसकृज्जपात्॥
८९॥गुरुशुश्रूषणांकुर्वन्यावज्जीवंनरोत्तमः॥यत्पुण्यं

मर्जयेत्तज्ञागर्वर्षंत्रिषवशंजपन्॥५०॥वेदपारायणात्पु
ण्यंयदत्रपरिपठ्यते॥तत्सर्वम्मासेनलभ्नतेत्रिसंध्यंपरि
कीर्तनात्॥५१॥गंगायास्तवराजस्यप्रत्यहंपरिशील
नात्॥शिवभक्तिमवाप्नोतिविष्णुभक्तोथवाभवेत्॥५२॥
यःकीर्तयेदनुदिनंगंगानामसहस्रकं॥तत्समीपेसह
चरीगंगादेवीसदाभवेत्॥५३॥सर्वत्रपूज्योभवतिस
र्वत्रविजयीभवेत्॥सर्वत्रसुखमाप्नोतिजान्हवीस्तोत्र
पाठतः॥५४॥सदाचारीसविज्ञेयःसशुचिस्तुसदैवहि॥
कृतसर्वसुरार्चःसकीर्तयेद्यइमांस्तुतिं॥५५॥तस्मिंत्त
प्तेभवेत्तप्ताजान्हवीनात्रसंशयः॥तस्मात्सर्वप्रयत्नेनगं
गाभक्तंसमर्चयेत्॥५६॥स्तवराजमिमंगांगंशृणुयाद्य
श्चैवपठेत्॥श्रावयेदथतद्भक्तान्दंभलोभविवर्जितः॥५७॥ रामः

मुच्यते त्रिविधैः पापैर्मनोवाक्कायसंभवैः ॥ स्मरणानि: पापतामेति पितॄणां च प्रियो भवेत् ॥ १९८ ॥ सर्वदेवप्रियश्चापि सर्वर्षिगणसंमतः ॥ अंते विमानमारुह्य दिव्यस्त्रीशतसंवृतः ॥ १९९ ॥ दिव्याभरणसंपन्नो दिव्यभोगसमन्वितः ॥ नंदनादिवने स्वैरं देववत्संप्रमोदते ॥ २०० ॥ भुज्यमानेषु विप्रेषु श्राद्धकाले विशेषतः ॥ जपन्निदं महास्तोत्रं पितॄणां तृप्तिकारणं ॥ २०१ ॥ यावंति तत्र सिकूथानि यावंतो वुकणास्थिताः ॥ तावंत्येव हि वर्षाणि मोदंते स्वः पितामहाः ॥ २०२ ॥ यथा प्रीणंति पितरो गयायां पिंडदानतः ॥ तथैव तृप्युः श्राद्धे स्तवस्यास्यानुसंस्रवात् ॥ २०३ ॥ एतत्स्तोत्रं गृहे यस्य लिखितं परिपूज्यते ॥ तत्र पापभयं नास्ति शुचिस्तद्भवनं भवेत् ॥ २०४ ॥ अगस्त्यो किं वहूक्तेनश्र

शुमेनिश्चितंवचः॥संशयोनात्रकर्तव्यःसंदिग्धरिफ
लंनहि॥२०५॥यावंतिमर्त्यैस्तोत्राणिमंत्रजालान्य
१८ नेकशः॥तावंतिस्तवराजस्यगांगेयस्यसमानिन॥२०६॥
यावज्जन्मजपेद्यस्तुनाम्नामेतत्सहस्रकं॥सकीकटेष्व
पिमृतोनपुनर्गर्भमाविशेत्॥२०७॥नित्यंनियमवाने
तद्योजपेत्स्तोत्रमुत्तमं॥अन्यत्रापिविपन्नःसगंगाती
रेमृतोभवेत्॥२०८॥एतत्स्तोत्रंवरंरम्यंपुराप्रोक्तंपिना
किना॥विष्णवेनिजभक्तायमुक्तिबीजाक्षरास्पदं॥२०९॥
गंगास्नानप्रतिनिधिस्तोत्रमेतन्मयेरितं॥सिस्नासुर्जा रामं
ह्नवींतस्मादेतत्स्तोत्रंजपेत्सुधीः॥२१०॥इतिश्रीस्कंद
पुराणेकाशीखंडेगंगासहस्रनामस्तोत्रंसमाप्तम्॥

नी ॥ ६७ ॥ मृगयामृगमांसा च मृगत्वक् मृगलोचना
वागुरा बंधरूपत्वं बंधरूपा वधोद्धता ॥ ६८ ॥ वंदी वंदीस्त
ताकारा कारा बंधविमोचनी । शृंखला खलहा ब
द्धा दृढबंधविमोक्षणी ॥ ६९ ॥ अंबिकांबालिका चांबा
सुरसाधुजनार्चिता । कौलकी कुलविद्या च सुकुला
कुलपूजिता ॥ ७० ॥ कालचक्रभ्रमभ्रांता विभ्रमा भ्र
मनाशिनी । वात्याली मेघमाला च सुवृष्टिसस्यवर्द्ध
नी ॥ ७१ ॥ अकारा च इकारा च उकारा एकाररूपिणी ह्री
कारी बीजरूपा च क्लींकारांबरवासिनी ॥ ७२ ॥ सर्वाक्षर

न॰स॰
९

मयी शक्तिरक्षराववमालिनि सिंदूरारुणवर्णा च सिंदू
रतिलकप्रिया ॥ ७३ ॥ वश्या च वश्यबीजा च लोकवश्यवि
नाशिनि ॥ नृपवश्या नृपसेव्या नृपवश्यकरीप्रिया ॥ ७४
महिषी नृपमान्या च नृपज्ञा नृपनंदिनी ॥ नृपधर्ममयी
धन्या धनधान्यविवर्द्धिनी ॥ ७५ ॥ चातुर्वर्णमयिमूर्त्ति
श्चतुर्वर्णैश्च पूजिता ॥ सर्वधर्ममयी सिद्धिश्चतुराश्रम
वासिनि ॥ ७६ ॥ ब्राह्मणि क्षत्रिया वैश्या शूद्रीचवरवर्ण
जा ॥ वेदमार्गरतिर्यज्ञा वेदविश्वविनाशिनि ॥ ७७ ॥ अस्त्र
शस्त्रमयि विद्या वरशस्त्रास्त्रधारिणी ॥ सुमेधा सत्यमे
धा च भद्रकाल्यपराजिता ॥ ७८ ॥ गायत्री संस्कृतिः सं

राम
९

स्यामा कायस्था कामवर्जिता । सुस्मीता सुमुखी श्यामा म-
लप्रकृतिरीश्वरी ॥ ४४ ॥ अजा च बहुवर्णा च पुरुषार्थप्रव-
र्त्तनि । रक्ता निला सिता स्यामा कृष्णा पीता च कर्बुरा ॥ ४५
क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया । कला काष्ठा
मुहुर्त्ता च निमेषा कालरूपिणी ॥ ४६ ॥ सुवर्णरसना नासा
चक्षुः स्पर्शवती रसा । गंधप्रिया सुगंधा च सुस्पर्हा च म-
नोगति ॥ ४७ ॥ मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी
पद्मयोनी सुकेशी च सुलिंगा नइरूपिणी ॥ ४८ ॥ योनीमु-
द्रा महामुद्रा खेचरी खगगामिनी ॥ मधुश्रीर्माधवी वल्ली
मधुमत्ता मदोद्धता ॥ ४९ ॥ मातंगी सुकहस्ता च पुष्पवाला

न.स.
७

सुखापिनि। रत्नकांवरधराक्षी च रक्तपुष्पावलिसनि ॥५०
शुक्लांवरधराधीरा महाश्वेता वसुप्रिया ॥ सुवेणी पद्महस्ता
च मुक्ताहारविभूषणा ॥५१॥ कर्पूरामोदनी श्वासा ममनि
पद्ममंदिरा ॥ खड्गिनी चक्रहस्ता च भुसुंडी परिघायुधा ॥५२
चापिनि पाशहस्ता च त्रिशूलवरधारिणी ॥ सुवर्णा शक्ति
हस्ता च मयूरवरवाहना ॥५३॥ वरायुधधराधीरा : वीरपान
मदोत्कटा ॥ वसुधा च सुधारा च जया शाकंभरी शिवा ॥५४
विजया च जयंती च ॥ सुस्तनी शत्रुनाशिनि अंतर्वत्नी देवशं
क्तिवरदा वरदायिनी ॥५५॥ शीतला च सुशीला च बालग्रह
विनाशिनी ॥ कुमारी च सुवर्णा च कामाख्या कामवंदिता ५६

राम
७

जालंधरधरानंदे कामरूपविलासिनि ॥ कामवीजवासि
सत्यासत्यधर्मपरायणा ॥ ५७ ॥ स्थूलमार्गस्थिता सूक्ष्मा
सूक्ष्मबुद्धिःप्रबोधिनि ॥ षट्कोणा च त्रिकोणा च त्रिने
त्रा त्रिपुरेश्वरी ॥ ५८ ॥ वृषप्रिया वृषारूढा महिषासुरघा
तिनि शुंभदर्पहरा दीप्ता दीप्तपावकसंनिभा ॥ ५९ ॥ कपा
लभूषणा काली कपालमाल्यधारिणी ॥ कपालकुंड
लादीर्घा शिवदूती घनध्वनि ॥ ६० ॥ सिद्धिदा बुद्धिदा नित्या
सत्यमार्गप्रबोधिनि ॥ कंबुग्रीवा वसुमति छत्रछायाकृ
तालया ॥ ६१ ॥ कुंडलिनी जगद्गर्भा भुजंगाकारशायिनी

न॰स॰
८

म्रोऽस्त्वसरस्सप्तजिकावनाग्निनालम्बडाल्लिनी ॥८२॥ मूला
धारानिराकारा वह्निकुंडकृतालया ॥ वायुकुंडकृवासी
नानिराधारानिराश्रया ॥८३॥ वल्लीतंतुसमुत्थाना षड्रसा
स्वादुलोलुपा ॥ श्वासोच्छ्वासगतिर्जीवा ग्राहिणी वह्नि
संश्रया ॥ तपस्विनी तपः सिद्धा स्तापसी च तपप्रिया
तपोनिष्ठा तपोयुक्ता तपसः सिद्धिदायिनि ॥८४॥ सप्तधा
तु मयिमूर्त्तिस सप्तधालंतराश्रया ॥ देहपुष्टिर्मनस्तुष्टिर
न्नपुष्टिर्बलोद्धता ॥८५॥ औषधी वैद्यमाता च द्रव्यशक्तिः
प्रभावति । वैद्यविद्या चिकित्सा च सुपथ्या रोगनाशि

राम
८

ध्या सावित्रि त्रिपदाश्रया ॥ त्रिसंध्या त्रिपदा धात्री सुप
ध्या सामगा श्रुति ॥ ७९ ॥ पंचाली बालिका बाला बालक्री
डा सनातनी गर्भाधारधरा शून्या गर्भाश्रय निवासिनी
॥ ८० ॥ सुरारिघातिनि कृत्या पूतना च तिलोत्तमा ॥ लज्जा
रसवतीनंदा भवानी पापनाशिनी ॥ ८१ ॥ पट्टांबरधरा गी
तिः सुगीतिर्ज्ञानगोचरा ॥ सप्तस्वरमयी तंत्री षड्जमध्यम
धैवता ॥ ८२ ॥ मूर्च्छना ग्रामसंस्थाना स्वस्था स्वस्थानवासि
नी ॥ अट्टाट्टहासिनी प्रेता प्रेतासन निवासिनि ॥ ८३ ॥ गी
तनृत्यप्रिया कामा तुष्टिदा पुष्टिदा समा ॥ रा कुमारी महा
देवी वैस्य वीन सरप्रिया ॥ ८४ ॥ निष्ठा सत्यप्रिया प्रज्ञा लोके

शवसुरोत्तमा ॥ सविषाऽश्वालिनिऽश्वाल्गा विषमोहार्ति
नाशिनि ॥ ७५ ॥ विषारिर्नागदमनी कुरुकुल्यामृतोद्भवा
भूतभीतिहरारक्षा भूतावेशविनाशिनि ॥ ७६ ॥ रक्षोघ्नी
राक्षसी रात्री दीर्घनिद्रा दिवांगति ॥ चंडिका चंद्रकांतिश्च
सूर्यकांतिर्निशाचरि ॥ ७७ ॥ डाकिनी शाकिनी शिष्या हा
स्तोत्रकवाकिनी: महामारीविनिद्रा च चंडिमृत्युपिना
शिनी ॥ ७८ ॥ चंद्रमंडलसंकाशा चंद्रमंडलवर्त्तिनि ॥ सित
सितप्रिया श्ववर्गा सकलावनदेवता ॥ ७९ ॥ गुरुरूपधरा
गुर्वी मृत्युमारी विशारदा ॥ अणीमादिगुणोपेता सुस्पृ
हा कामरूपिणी ॥ ८० ॥ अष्टसिद्धिप्रदा प्रौढा दुष्टदानव